Website : aisanskritsahityasammelan.com
E-mail : sanskritsahityasammelan@gmail.com
ISSN 2395-3055
सितम्बर-अक्टूबर, 2021 ₹ 25

विशेषज्ञ समिति द्वारा समीक्षित संस्कृत की एक श्रेष्ठ मासिक शोधपत्रिका

# संस्कृत-रत्नाकरः

## Sanskrit Ratnakar

(A peer reviewed monthly Sanskrit Research Journal)



अखिल भारतीय संस्कृत साहित्य सम्मेलन (रजि0)
संस्कृत भवन, ए-10, कुतुब सांस्थानिक क्षेत्र, अरुणा आसफ अली मार्ग,
नई दिल्ली - 110067



# केवलसमासस्य वैलक्षण्यं, चकारार्थश्च

**अर्चना शर्मा**

सहायकाचार्या, केन्द्रीयविश्वविद्यालयः

धर्मशाला, हिमाचलप्रदेशः

## सह सुपा २.१.४

भगवता पाणिनिना विरचितेषु षड्विधेषु सूत्रेष्वन्यतमं विधिसूत्रमिदम्। 'सह' इति अव्ययपदम् 'सुपा' इति तृतीयैकवचनान्तमिति द्विपदमिदं सूत्रम्। सूत्रेऽस्मिन् "सुबामन्त्रिते पराङ्गवत्स्वरे"[1] **इत्यतः सुप् इति पदमनुवर्तते, "प्राक्कडारात्समासः"[2]** इत्यस्माच्च समासपदस्य अधिकारो वर्तते। अनुवृत्तस्य सूत्रस्थस्य च सुपः प्रत्ययत्वात् 'प्रत्ययग्रहणे तदन्तग्रहणम्' इति परिभाषया तदन्तग्रहणम्। तथा च सुबन्तं पदं सुबन्तेन समर्थपदेन सह समस्यते इति सूत्रार्थः फलति। यथोदाहरणम् 'पूर्वं भूतः भूतपूर्वः' इति। पूर्व अम् भूत सु इत्यलौकिकविग्रहे अनेन सूत्रेण समासः, समासत्वात् प्रातिपदिकत्वेन सुब्लुकि पूर्वभूत इति दशायां 'भूतपूर्वे चरट्'[3] इति सूत्रनिर्देशाद् भूतशब्दस्य पूर्वनिपाते विभक्तिकार्ये च 'भूतपूर्वः' इति निष्पद्यते। अत्रेदमवधेयं यत् विधीयमानः समासः तयोरेव सुबन्तयोर्भवति ययोर्मध्ये एकार्थीभावरूपसामर्थ्यं वर्तते।

ननु सुपा इत्यत्र तृतीययैव सहेति लाभात् कथं पुनः सूत्रे सहग्रहणमिति चेदुच्यते - **सहेति योगो विभज्यते** इत्यादिना। समाससंज्ञायाः अन्वर्थत्वादे-कस्याप्रसङ्गात्सुपेत्येतावतैव सिद्धे सहग्रहणं योगविभागार्थमिति तात्पर्यम्।

योगविभागः - सह सुपा' इत्यस्य योगविभागेन 'सह' इत्येकं 'सुपा' चापरमिति सूत्रद्वयं कल्प्यते। प्रथमसूत्रे 'सुबामन्त्रिते' इत्यादिभ्यः सुप्पदमनुवर्तते। 'समर्थः पदविधिः"[4] इत्यस्माच्च समर्थपदमनुवर्त्य तच्च तृतीयान्ततया विपरिणम्यते तथा च सुबन्तं पदं समर्थेन पदेन सह समस्यते इति प्रथमसूत्रस्यार्थः फलति अनेन सूत्रेण पर्यभूषयत्, अनुव्यचलत् इत्यादयः प्रयोगाः साध्यन्ते अत्र च सुबन्तपदानां तिङन्तपदेन सह समासविधानमेव तात्पर्यम् द्वितीयसूत्रस्य च कार्यं मूलसूत्रवदिति बोद्धव्यम्।



ISSN 2395-3055

अत्रेद तत्त्वं यदि सूत्रस्य योगविभागो न क्रियते तदा सुबन्तपदानां सुबन्तपदेन सदैव समासो विधयेत तिङन्तेन च न स्यात्। यथा स्यात्तिङन्तेनापीत्येतदर्थं सूत्रस्य योगविभागः कल्पनीयः ।

ननु तर्हि घटो भवति इत्यत्रापि समासेन पटभवति' इत्यपि प्रयोगः साधु स्यादिति न शङ्कनीयम् अस्यैव तात्पर्यं स्फोरयन् दीक्षितेन भणित कौमुद्याम् **योगविभागस्येष्टसिद्ध्यर्थत्वात् कतिपयतिङन्तोत्तरपदोऽयं समासः** इति शिष्टप्रयोगसाधुत्वाय हि योगविभागः व्याकरणशास्त्रस्य च लक्ष्यैकचक्षुष्कतया लक्ष्यानुरोधेन तेषां साधुत्वप्रतिपादनमेव मुख्यं तात्पर्यम्। कतिपयानि तिङन्तानि उत्तरपदानि यस्य तादृशः कतिपयतिङन्तोत्तरपदोऽयं समासः न तु सर्वत्र तिङन्तोत्तरपदे स च समासः छन्दसि एव भवति। एतेन पर्यभूषयत्, अनुव्यचलत् इत्यादयः वैदिकप्रयोगाः सिद्ध्यन्ति।

अस्य सूत्रस्य अव्ययीभाव तत्पुरुष-बहुव्रीहि द्वन्द्वाधिकारानन्तर्भूतत्त्वात् समासाधिकारत्वाच्च एतत्सूत्रकृतसमासः विशेषसंज्ञारहित 'केवलसमासः' इति कथ्यते।

चार्थे द्वन्द्वः २.२.२९

षड्विधेषु सूत्रेष्वन्यतमं विधिसूत्रमिदम् अनेन सूत्रेण द्वन्द्वसमासो विधीयते 'चार्थे इति सप्तम्यैकवचनान्तम् 'द्वन्द्वः' इति च प्रथमैकवचनान्तम् इति द्विपदमिदं सूत्रम् अत्र "प्राक्कडारात्समासः"[5] **"विभाषा"**[6] इति च सूत्रद्वयमधिक्रियते "सुबामन्त्रिते पराङ्गवत्स्वरे"[7] इत्यतः सुप् इति "अनेकमन्यपदार्थे"[8] इत्यस्माच्च अनेकम् इति द्वे पदेऽनुवर्तते ।

चास्य अर्थशार्थः तस्मिन् चार्थे इति षष्ठीतत्पुरुषसमासः । सुप् इत्यस्य प्रत्ययत्वेन तदन्तविधी अनेकम् इत्यनेन अन्वयात् अनेकसुबन्तम् इति लभ्यते। तथा चार्थे वर्तमानम् अनेकं सुबन्तं परस्परं विकल्पेन समासः प्राप्नोति स च समासः द्वन्द्वसंज्ञको भवतीति सूत्रस्य फलितोऽर्थः ।

अथ के चार्थाः इति जिज्ञासायां श्रीमता दीक्षितेनोक्तसिद्धान्तकौमुद्याम् **समुच्चयान्वाचयेतरेतरयोगसमाहाराचार्थाः।** परस्परनिरपेक्षस्यानेकस्यैकस्मिन्नन्वयः समुच्चयः अन्यतरस्यानुषङ्गिकत्वेनान्वयोऽन्वाचयः। मिलितानामन्वय इतरेतरयोगः। समूहः समाहारः।

समुच्चयः - यत्र परस्परनिरपेक्षितानाम् अनेकपदानाम् एकस्मिन् क्रियापदेऽन्वयो भवति तत्र समुच्चयः चार्थः। यथा ईश्वरं गुरुञ्च भजस्व इति। ईश्वरं भजस्व गुरुमपि इति तात्पर्यम् अत्र भजस्व इति एकस्यैव क्रियापदस्य आवृत्या प्रथमं तावत् ईश्वरपदस्य क्रियायामन्वयः, तदनन्तरम् आवृत्तेः क्रियापदे गुरुपदस्य चान्वय इत्येतदेवानयोः परस्परं निरपेक्षत्वम्। निरपेक्षत्वेन चासामर्थ्यान्नात्र समासः किन्तु वाक्यमेव।

अन्वाचयः यत्र अन्यतरस्य पदस्य एकस्मिन् क्रियापदे आनुषङ्गिकत्वेन परार्थप्रवृत्तिविषयत्वेनान्वयः इतरस्य पदस्य च अन्यस्मिन् क्रियापदे प्राधान्येन मुख्यप्रवृत्तिविषयत्वेन चान्वयः तत्र अन्वाचयः चार्थः। यथा - भिक्षामट गाञ्चानय इति । भिक्षाम् अटनेन प्राप्नुहि तदा यदि गौः प्राप्यते चेतामपि आनयेरिति तात्पर्यम् । अत्र तु भिक्षायाः अवश्यकर्त्तव्यतारूपेण क्रियायामन्वयः, गवानयने च अधिकः प्रयत्नो न विधेय इति ज्ञायते तथा च प्रकृतेऽपि भिक्षागोपदयो परस्परं सामर्थ्यभावान्न समासः ।

इतरेतरयोगः - यत्र परस्परापेक्षितानाम् अनेकपदानां समुदितरूपेणैव एकस्मिन् क्रियापदेऽन्वय तत्र इतरेतरयोगः चार्थः । यथा- धवश्च खदिरश्च धवखदिरौ इति। छिन्धीति शेषः। अत्र चशब्दः धवखदिरयोः परस्परं साहित्यं सूचयति। साहित्यञ्च एकधर्मावच्छिन्नस्य एकधर्मावच्छिन्नेऽन्वयः। परस्परापेक्षितयो उद्भूतावयवभेदसमूहरूपयोः धवखदिरपदयोः समुदितरूपेणैव छिन्धिक्रियापदेऽन्वयो वर्तत इत्येतदेवानयोः पारस्परिकसामर्थ्यम्। सामर्थ्यतया चात्र समासः।

समाहारः - समूह समाहारः। तिरोहितावयवगतसंख्यसमूह इत्यर्थः। यथा संज्ञा च परिभाषा च संज्ञापरिभाषम् इति। अत्रेदं तत्त्वम् इतरेतरयोगद्वन्द्वे समस्यमानपदार्थगतसंख्यां समुदाये समारोप्य द्विवचनबहुवचनान्ततया प्रयोगः। समाहारद्वन्दे तु समस्यमानपदार्थगतसंख्या समुदाये नारोप्यते किन्तु तत्समुदाय एवं एकत्वबुद्ध्या एकवचनान्तः प्रयोगः। प्रकृतेऽपि चशब्दः परस्परसाहित्यसूचनयैव सामर्थ्यतया चात्र समासः। अत्र समस्तस्य संज्ञापरिभाषाशब्दस्य "स नपुंसकम्"[9] इति नपुंसकत्वेन "ह्रस्वो नपुंसके प्रातिपदिकस्य"[10] इति ह्रस्वत्त्वाच्च संज्ञापरिभाषम् इति निष्पद्यते।

ननु समाहारद्विगुद्वन्द्वयोः को भेद इति चेत् समाहारद्विगुसमासे तदीयलौकिकालौकिकविग्रहयो षष्ठ्यन्तपदानां प्रयोगः। यथा पञ्चानां गङ्गानां समाहारः इत्यादि अस्योदाहरणम्। समाहारद्वन्द्वे तु विग्रहवाक्ये प्रथमान्तानामेव पदानां प्रयोगः। यथा संज्ञा च परिभाषा च इति। संज्ञायाश्च परिभाषायाश्च इत्येवं तु द्वन्द्वस्य न द्विगुवद् विग्रहः प्रथमान्तानामेव द्वन्द्व इति नियमात्।

विशेषः - चतुर्विधेषु चार्थेषु इतरेतरयोगसमाहारयोरेव समासः तयोरेव सामर्थ्यात् । समुच्चयान्वाचययोस्तु सामर्थ्याभावान्न समासः "समर्थः पदविधिः" इति समर्थपदानामेव समासनियमात् इत्यलम् ।

**स्रोत एवं सन्दर्भ –**


1. पा.सू. 2.1.2
2. पा.सू. 2.1.3
3. पा.सू. 5.3.53
4. पा.सू. 2.1.1
5. पा.सू. 2.1.3
6. पा.सू. 2.1.11
7. पा.सू. 2.1.2
8. पा.सू. 2.2.24
9. पा.सू. 2.4.17
10. पा.सू. 1.2.47